# Shri Aravindopanishad

# શ્રીઅરવિન્દોપનિષત્

## Document Information

Text title : AravindopaniShad

File name : aravindopaniShat.itx

Category : upanishhat

Location : doc_upanishhat

Author : Traditional

Transliterated by : P. R. Kannan prkannanvashi at yahoo.com

Proofread by : P. R. Kannan prkannanvashi at yahoo.com

Translated by : in Tamil by P. R. Kannan

Latest update : March 4, 2016

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 21, 2023

*sanskritdocuments.org*

Shri Aravindopanishad

# શ્રીઅરવિન્દોપનિષત્

ૐ । એકમેવાદ્વિતીયં બ્રહ્મ સદસદ્રૂપં સદસદતીતં નાન્યત્ કિઞ્ચિદસ્તિ ત્રિકાલધૃતં ત્રિકાલાતીતં વા સર્વન્તુ ખલુ બ્રહ્મૈકં યત્ કિઞ્ચ જગત્યામણુ વા મહદ્વોદારં વાનુદારં વા બ્રહ્મૈવ તદ્ બ્રહ્મૈવ જગદપિ બ્રહ્મ સત્યં ન મિથ્યા ।

સ એવ પરાત્પરઃ પુરુષસ્ત્રિકાલાતીતઃ સકલભુવનાતીતઃ સકલભુવનપ્રવિષ્ટઃ સદતીતોઽસદતીતઃ સન્મયઃ ચિન્મય આનન્દમયોઽનાદ્યન્તઃ સનાતનો ભગવાન્ ।

સ નિર્ગુણો ગુણાન્ ધત્તે સગુણોઽનન્તગુણો નિર્ગુણત્વં ભુઙ્ક્તે સ્વયઞ્ચાતિવર્તતે નિર્ગુણત્વઞ્ચ સગુણત્વઞ્ચ ન નિર્ગુણો ન ગુણી કેવલ એવ યઃ ।

સ ભુવનાતીતો ભુવનાનિ ધારયતિ ભુવનભૂતો ભુવનાનિ પ્રવિશતિ કાલાતીતઃ કાલો ભવત્યનન્તઃ સાન્તઃ પ્રકાશત એકો બહવોઽરૂપો રૂપી વિદ્યાવિદ્યામય્યા ચિચ્છક્ત્યા ।

સ્વયન્તુ ન ધર્તા ન ધાર્યો નાનન્તઃ ન સાન્તો નૈકો ન બહુઃ નારૂપો ન રૂપી કેવલ એવ યઃ ।

સર્વાણિ ત્વેતાનિ નામાનિ યદેકત્વઞ્ચ બહુત્વઞ્ચાનન્તઞ્ચ સાન્તઞ્ચ પ્રકાશન્ત એવ ચિદાત્મનિ ચિન્મયે જગતિ ।

ૐ તત્સત્ યચ્ચ સચ્ચિદેવ તચ્ચિન્મયં જગત્ ભાસતે ચિદાત્મનિ સત્યપ્રકાશઃ સત્યસ્ય ભગવતઃ ।

યથા સૂર્યસ્ય પ્રતિબિમ્બ એકઃ શાન્તે જલે બહવશ્ચલે સત્યઃ સૂર્યઃ સત્યઃ પ્રતિબિમ્બઃ સત્યપ્રકાશઃ સતઃ સૂર્યસ્ય ન સ સ્વપ્નઃ સતઃ પ્રકાશસ્તુ સઃ, યથા વા સૂર્યસ્ય જ્યોતિઃ સૌરં જગત્ સ્વશક્ત્યા ધાવદિવ પૂરયત્ પ્રકાશતે સત્યં જ્યોતિઃ સત્યપ્રકાશઃ સતઃ સૂર્યસ્ય

ન સોઽલીકા ભાતિઃ સતઃ સત્યપ્રકાશસ્તુ સઃ, યથા વા સૂર્યસ્ય જ્વાલામયં બિમ્બં ન સ્વયં સૂર્યઃ સૂર્યસ્ય તુ સૂર્યત્વં પ્રકાશયત્યેતદન્નમયં રૂપમન્નાશ્રિતે જ્ઞાને તદ્રૂપાતીતસ્તુ સૂર્યઃ સત્યઃ સૂર્યઃ સત્યં રૂપં બિમ્બાકૃતિ સત્યપ્રકાશઃ સતઃ સૂર્યસ્ય ન સ માયાન્વિતઃ સતઃ સત્યપ્રકાશસ્તુ સઃ, તથેહ જગદ્બ્રહ્મ સત્યપ્રકાશો ભગવતઃ ન સ્વપ્નઃ ન માયાન્વિતં નાલીકા ભાતિઃ સતઃ સત્યપ્રકાશસ્તુ તદ્ ન સ્વયં ભગવાન્ તથાપિ સ્વયમેવ સઃ । એષા પરા માયૈષા યોગમાહાત્મ્યં રહસ્યમયસ્ય યોગેશ્વરસ્ય કૃષ્ણસ્યૈષા ચિચ્છક્ત્યા આનન્દમયી લીલા પરસ્યાતર્ક્યા ગતિઃ ।

સર્વમિદમર્થતઃ સત્યં પરાર્થતઃ અસત્યમિતિ મનસ્તુષ્ટ્યર્થં વિજ્ઞાનાર્થમુચ્યતાં ન હિ કિઞ્ચિદપ્યસત્યં સત્યે બ્રહ્મણિ ।

એવં યત્ પ્રકાશતે જગદાનન્દ એવ તત્ ।

ઓં તત્સત્ યચ્ચ સચ્ચિદેવ તદ્યચ્ચ ચિત્ સ આનન્દઃ । યત્તુ નિરાનન્દમિતિ ભાસતે દુઃ ખમિતિ દુર્બલમિત્યજ્ઞાનમિતિ તદાનન્દસ્ય વિકાર આનન્દસ્ય ક્રીડા ।

યો હિ જીવઃ સ આનન્દમયઃ પ્રચ્છન્નો ભગવાન્ સ્વપ્રકાશમયં જગદ્બ્રહ્મ ભોક્તુમવતીર્ણઃ । ય એષ દુઃખભોગઃ સ ભોગ એવાનન્દમયસ્તસ્યાનન્દમેવાનન્દમયો ભુઙ્ક્તે ।

કો હિ નિરાનન્દં ભોક્તુમુત્સહેત યઃ સર્વાનન્દમયઃ સ એવોત્સહતે નિરાન્દમયસ્તુ નિરાનન્દં ભુઞ્જાનઃ ન ભુઞ્જીતાનન્દં વિના પ્રણશ્યેત્ । કો દુર્બલો ભવિતું શક્નુયાદ્યઃ સર્વશક્તિમાન્ સ એવ શક્નુયાદ્ દુર્બલો હ્યાક્રાન્તો દુર્બલત્વેન ન તિષ્ઠેચ્છક્તિં વિના પ્રણશ્યેત્ । કોઽજ્ઞાનં પ્રવેષ્ટું સમર્થો યઃ સર્વજ્ઞાનમયઃ સ એવ સમર્થોઽજ્ઞસ્તુ તસ્મિંસ્તિમિરે ન ધ્રિયેતાસત્ત્વસદેવ ભવેદ્ જ્ઞાનં વિના પ્રણશ્યેત્ । જ્ઞાનસ્ય ક્રીડાજ્ઞાનં સ્વસ્મિન્નાત્મગોપનં શક્તેઃ ક્રીડા દૌર્બલ્યં નિરાનન્દમાનન્દસ્ય ક્રીડાત્મગોપનં સ્વાત્મનિ ।

સાનન્દં હસતિ જીવઃ સાનન્દં ક્રન્દત્યશ્રૂણિ મુઞ્ચતિ તમોમય આનન્દે ભાસમાન ઇવ યાતનાભિશ્ચેષ્ટમાનઃ સાનન્દં સ્ફુરતિ સાનન્દં સ્ફુરતિ ચેષ્ટમાનઃ પ્રચણ્ડાભી રતિભિઃ । પૂર્ણભોગાર્થં તસ્યાનન્દસ્ય તામસસ્યાંશસ્ય તામસો ભૂત્વાનન્દં ગોપયતિ ।

અજ્ઞાનં મૂલમેતસ્ય ભાવસ્ય સાન્ત એવાહમિત્યશક્તો
દુર્બલો દુઃખી મયા કર્તવ્યં જ્ઞાતવ્યં લબ્ધવ્યં પ્રયાસેન તપઃ ક્ષયેણ
મૃત્યુના સ ત્વમેષોઽહં યત્ત્વં ન તદહં યત્તવ શુભં તન્મમાશુભં
યેન તવ લાભસ્તેન મમ હાનિઃ ત્વામેવ હન્યાં સુખી ભવિષ્યામિ
નૈવ સાત્ત્વિકોઽહં ત્વામેવ સુખિનં કરોમિ સ્વદુઃખેન સ્વહાન્યા
સ્વમૃત્યુનેત્યાદ્યજ્ઞાનસ્ય સ્વરૂપં મનસિ ।

અહઙ્કાર એવ બીજમહઙ્કારમોક્ષાદજ્ઞાનમોક્ષઃ
અજ્ઞાનમોક્ષાદ્ દુઃખાન્મુચ્યતે આનન્દમયોઽહં
સોઽહમેકોઽહમનન્તોઽહં સર્વોઽહમિતિ વિજ્ઞાયાનન્દમયો
ભવત્યાનન્દો ભવતિ ।

એષ એવ મોક્ષઃ । સ મુક્તઃ સર્વેષાં ભોગાન્ ભુઙ્ક્તે
સર્વાનાનન્દાનનન્તં ભુઞ્જાનો ન સાન્તૈર્વિયુજ્યતે સાન્તાનિ ભુઞ્જાનો
નાનન્તેન હીયતે સ એકો ભવતિ બહુર્ભવતિ સ હ્યજો જાયત ઇવ
જાયમાનોઽપિ ન જાયતે ન બધ્યતે ન જન્મ તસ્ય વિદ્યતે
આત્મન્યાત્માત્મના પ્રકાશયામ્યાત્માનમિતિ જ્ઞાનાદ્ વિમુક્તઃ ક્રીડતે ।

લીલાર્થં હિ જગદાનન્દાર્થં લીલામય ઇતિ લીલાં
કુરુતાનન્દસ્ય પુત્રાઃ યુક્તાઃ ક્રીડતાનન્દં ભુઙ્ધ્વમેકં ભોગ્યં
ભગવન્તં પ્રાપ્ય ભુઙ્ધ્વં સર્વવસ્તુષુ ।

આનન્દં હિ પ્રવક્ષ્યામિ ભગવતાદિષ્ટઃ ।
તામસમપાવૃત્યાનન્દઃ પ્રકાશતાં તસ્ય પુત્રાઃ ।

Encoded and proofread by P. R. Kannan prkannanvashi at yahoo.com
See the link for Tamil commentary by P.R. KANNAN

*Shri Aravindopanishad*

pdf was typeset on January 21, 2023

Please send corrections to *sanskrit@cheerful.com*